तत्पराख्यं तदर्द्धञ्च परार्द्धमभिधीयते”। “त्रीणि कल्पशतानि स्युस्तथा पञ्चाशद्द्विजोत्तमाः। ब्रह्मणः कथितं वर्षं पराख्यं तच्च यत्पदम्” कौर्मे ५अ०। न्यायमते १०व्यापकसामान्ये “सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च” भाषा० ११तथाजातौ स्त्री “व्यापकत्वात् परापि स्यात् व्याप्यत्वादपराऽपि च”। व्यवस्था च दिग्देशकालैरवधिनियमभेदरूपा। १२वक्ष्यमाणदैशिककालिकपरत्वरूपगुणाश्रये त्रि०। तस्य दिशि दृष्टत्वेन तद्योगे पञ्चमी। ग्रामस्मात् पर इत्यादिप्रयोगात्। परस्येदम् गहा०छ कुकच्। परकीय परसम्बन्धिनि त्रि०। सर्वनामत्वादस्य वृत्तौ पुंवत्। परस्याः धनं परधनम् परस्यामित्यर्थे परत्र इत्यादि। १३बोधेच्छया उच्चरिते “यत्परः शब्दः स शब्दार्थ इति न्यायः तात्पर्यम्।

**परःकृष्ण** त्रि० परः कृष्णात् पारस्करा० सुट्। कृष्णात् परे छान्दोग्यो० १।६।५ उदा०।

**परःपुमस्** पु० परः अन्यः पुंसः पारस्करा० सुट्। स्वपुरुषादन्यस्मिन् पुरुषे “यत् परपुंसा वा पत्नी स्यात्” शत० ब्रा० १।३।१।२१

**परःशत** न० परे शतात् पारस्करा० सुट्। १शताधिकसंख्यायां २तत्सङ्ख्यातेषु च अमरः।

**परःश्वस्** अव्य० श्वः परं दिनं नि० पारस्करा० सुट्। आगामिपरदिवसात् परस्मिन् दिने अमरः पृषो०। परश्व इत्यप्यत्र। [२तत्संख्यातेषु च शत०ब्रा० १०।२।६।८

**परःषष्टि** स्त्री परःषष्टेः निपा० सुट्। १षष्टेरधिकसङ्ख्यायां

**परःसहस्र** न० सहस्रात् परं नि० सुट्। १सहस्राधिकसंख्यायां २तत्संख्यान्वितेषु च अमरः।

**परउर्वी** स्त्री परउर्व्याः नि० पारस्करा० सुट्। १उपधङ्भेदे “उपर्युपरि एकद्व्यादिष्टका बतष्टद्धियोस्वन्ति ताः परउर्व्यीरुपसदस्ताः कोचनानुतिष्ठन्ति” शत०ब्रा० १।४।४ २६ भाष्यम्।

**परकीय** त्रि०परस्येदम् गहादि०छ “कुक् जनस्य परस्य च” वार्त्ति० कुक्। १परसम्बन्धिनि। २नायिकाभेदे स्त्री रसमञ्जर्यां तद्भेदादिकमुक्तं यथा “अप्रकटितपरपुरुषानुरागा परकीया। सा च द्विविधा परोढा कन्यका चेति कन्यायाः पित्राद्यधीनत्वात् परकीयत्वम्। अस्या गुप्ता एव सर्वाः चेष्टाः। गुप्ता(रक्षिता) विदग्धाकुलटानुशयानामुदिताप्रभृतीनां परकीयायामेवान्तर्भावः। विदग्धा द्विविधा वाग्विदग्धा क्रियाविदग्धा। अनुशयाना वृत्तस्थानविघटनेन भाविस्थानाभावशङ्कया स्वानधिष्ठितसङ्केतस्थाने भर्त्तुर्गमनानुमानेन चानुशयाना भवति”। एतदुदाहरणानि तत्र दृश्यानि।

**परक्रान्तिज्या** स्त्री सू०सि० उक्तायां “परमापक्रमज्या तु सप्तरन्ध्रगुणेन्दवः” १३९७ योजनात्मिकायां ज्यायाम्। “क्रान्त्योज्ये त्रिज्ययाभ्यस्ता परक्रान्तिज्ययोद्धृते” सू० सि०। “तत्रूनं चतुर्दशशतं परमक्रान्तिज्येति रङ्गनाथः”।

**परक्षेत्र** न० ६त०। परकीये क्षेत्रे १कलत्रे २भूम्यादौ च। “अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः” “आददानः परक्षेत्रात् दण्डं दातुमर्हति” इति च मनुः।

**परगामिन्** त्रि० परं वाच्यं गच्छति लिङ्गेन समत्वात्। वाच्यलिङ्गे शब्दे “गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः” अमरः।

**परग्रन्थि** पु० परेण ग्रन्थिरत्र। अङ्गुलिपर्वणि हारा०।

**परचक्र** न० परस्य शत्रोश्चक्रम्। १शत्रोः राष्ट्रादौ भा० आ० १६अ०। वृ०सं०३अ०। २तज्ज्ञे ईतिभेदे [भिलाषे च।

**परच्छन्द** त्रि० परस्य छन्दो यत्र। १पराधीने ६त०। २परा-

**परच्छिद्र** न० ६त०। परस्य दोषादिच्छिद्रे

**परजात** त्रि० परेण जातः। औदासीन्येन परैधिते १परपुष्टे अमरः। २अन्येनोत्पन्ने कण्डगोलकादौ जन-ड। परजादयोऽप्यत्र।

**परजित** त्रि० परेण जितः। १परपुष्टे अमरः २पराजिते त्रि०

**परञ्ज** न० परञ्जयति जि-बा० ड मुम् च। १तैलयन्त्रे २क्षुरिकाफले च मेदि०।

**परञ्जन** पु० परां पश्चिमां दिशं जनयति स्वामित्वात् जन-अच् सर्वनाम्नो वृत्तौ पुंवत् मुम्। वरुणे हेमच०।

**परञ्जय** पु० परां पश्चिमां दिशं जयति स्वामित्वात् जि-बा० अच् मुम् पुंवद्भावः। १वरुणे त्रिका० २शत्रुजेतरि त्रि०

**परतङ्गण** पु० देशभेदे भा०स० ५१अ०।

**परतन्त्र** त्रि० परस्य तन्त्रमधीनता यत्र। पराधीने अमरः।

**परतर्कुक** त्रि० परः शत्रुस्तर्कुरिवास्य कप्। शत्रुभययुते “कुनखविवर्णैः परतर्कुकाश्च ताम्रैश्च पुरुषभूपतयः” वृ०सं० ६१अ० नरलक्षणोक्तौ।

**परतस्** अव्य० पर+विभक्त्यर्थे तसिल्। १परस्मादित्याद्यर्थे २पराधीने च। ततोभावे त्वपरतस्त्व पराधीनत्वे परतोग्राह्यशब्दे दृश्यम्। [तापके च।

**परतापन** न० गरुत्मतः १पुत्रभेदे हरिवं० २०२अ०, २पर-

**परतोग्राह्य** अव्य०परस्मात् ग्राह्यः। स्वभिन्नसामग्रीतो बोध्ये